शास्त्री-I

19.09.20
I

कालमानानि —

ज्योतिषशास्त्रे कालस्यैव गणना ज्योतिःपिण्डनक्षत्रादिबलेन क्रियते, कालविधानशास्त्रमिदं कालस्य सूक्ष्मावयवादारभ्य कल्पपर्यन्तमहत्कालखण्डस्य गणना एका सरणिबद्धपरम्परया प्रकाश्यते। प्रोक्तं सूर्यसिद्धान्ते—

लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः।
स द्विधा स्थूलसूक्ष्मत्वात् मूर्तश्चामूर्तमुच्यते ॥

अत्रोक्तमस्ति यत् – कालः द्विविधः, एकः लोकानामन्तकृत्कालः, अपरः — कलात्मकः कालः। अत्र कलनात्मको कालः द्विधा विभज्यते – एकः स्थूलः मूर्तश्चोच्यते, अपरः सूक्ष्मः अमूर्तश्च।

अत्र गणनात्मको यः स्थूलकालः तस्यैवैतानि नवविधकालमानानि भवन्ति इति सौलभ्येन गणितोपयोगित्वात्

भारतीयज्योतिषशास्त्रस्य सिद्धान्तग्रन्थेषु ब्राह्मं, दिव्यं, पैत्र्यं, प्राजापत्यं, गौरवम्, सौरं, सावनं, चान्द्रमार्क्षं चेति कालस्य नवविधमानानि सन्ति। तेषु सौर-सावन-चान्द्रनक्षत्राणां चतुर्णां मानानामेव उपयोगः जगति मानवव्यवहारे दृश्यते।

चन्द्रः अमान्ते रविणा सह योगं कृत्वा तस्माद् पृथक् सञ्चरितः स्वाधिकगत्या यावन्मितं पूर्वदिग्भं याति तावन्मितं चान्द्रमानं ज्ञेयम्। भास्करेण प्रोक्तं – रवीन्द्वोः युतिः संयुतिर्यावदन्यविधोर्मास एतच्च पैत्र्यं द्युरात्रम्।

अत्रोपस्थितप्रसङ्गेन ज्ञायते यत् अमान्तद्वयान्तर्वर्ती कालो चान्द्रमासः, एवञ्च अनयोर्मध्ये त्रिंशत्तिथयः भवन्ति, एवं त्रिंशद्विभाजिते सति चान्द्रमासः चान्द्रदिने परिणमति। एवमत्र सिद्ध्यति यत् एकतिथिमानमेव चान्द्रदिनमिति। चान्द्रमासे दिनप्रमाणं भास्करेण प्रोक्तं यत्—

P.T.O

सावनमानम् —

"इनद्वयद्वयान्तरं तदेव सावनदिनं तदेव मेदिनीदिनम्"। अत्रोक्त वासनाभाष्ये अर्कोदयोऽन्तरं यत् तदर्कसावनं दिनं तदेव कुदिनसंज्ञकं ज्ञेयम्। अतोऽपि पूर्ववन्मासवर्षयोः गणना सम्पद्यते। एवमत्र एकस्माद् सूर्योदयादारभ्य अपरसूर्योदयं यावत् मध्ये यावन्मितं मानं तदेव सावनम् इति, तस्यैवापरनाम कुदिनं भूदिनं वा ग्रन्थकारैः वर्णितम्। यथोक्तं सूर्यसिद्धान्ते —

उदयादुदयं भानोः सावनं तत् प्रकीर्तितम्।
सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः॥

सावनमानस्य व्यवहारप्रसङ्गे प्रोक्तम् —

सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते॥

एवमत्राचार्येण द्विविधसावनं प्रोक्तम् — मध्यमसावनं स्फुटसावनं च।

डॉ० सुदिप्त कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ।

मासो च चान्द्रोऽप्यमाकुरामा पूर्णेऽवस्तत्
कुदिनप्रमाणम् ।

अर्थात् 29।31।50 कुदिनात्मको चान्द्रमासो भवति । एवमेव चान्द्रवर्षे 354.22 सावनानि दिनानि भवन्ति ।

चान्द्रमानस्य व्यवहारप्रसङ्गः सौरतन्त्रे प्राप्यते –

तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा ।
व्रतोपवासयात्रायां क्रिया चान्द्रेण गृह्यते ॥

19.09.20
3

नाक्षत्रमानम् —

नक्षत्रेण उत्पन्नमानं नाक्षत्रमानं भवति। यथोक्तं सूर्य-सिद्धान्ते —

भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते।
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः॥

अर्थात् प्रवहवायुना प्रेरितनक्षत्रचक्रस्य भ्रमणं यावता कालेन भवति तावत् प्रमाणं नाक्षत्रं दिनं भवति। एवमत्र किमपि नक्षत्रमुदयानन्तरं प्रवहवायुना पुनर्यावता कालेन तत् नक्षत्रम् उदेति तावान् कालो हि नाक्षत्रदिनं भवति। एवम् एकस्मिन् नक्षत्रवर्षे 361 सावनदिनानि भवन्ति।

भास्करेणाह— "भवासरस्तु भभ्रमः"। अर्थात् भस्य भ्रमणं परिभ्रमणं वा भवासरो भवतीति।

नाक्षत्रमानप्रयोगो प्राप्यते —

" कार्तिक्यादिषु संयोगे कृत्तिकादिद्वयं द्वयम्।
अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्॥

अत्रोक्तं यत् — पूर्णिमायां यस्य-यस्य नक्षत्रस्य योगो भवति, तस्मात् तन्नक्षत्रसंज्ञाऽवगन्तव्यः। यथा अश्विनीनक्षत्रसंयुक्ता पूर्णिमा आश्विनमासः। भास्कराचार्येण 'घटिकादिकमार्क्षमानात्' अर्थात् घट्यादिमानज्ञानार्थं नाक्षत्रमानमेव गृह्यते इत्युक्तम्।

P.T.O.